No. 4390 - ध

Title शास्त्रदीपिकातृतीयाध्यायः

Author

Extent 92 Age

Subject

नं० ४३१० -घ

पराशरदीपिकातृतीयाध्यायः

नं० ४३१० -घ

पत्राणि १२

4310

F. =12

श्रीमन्मंगलमूर्त्तये नमः॥ ॥अथातः शेषलक्षणं॥ ॥एवं सिद्धे भेदे शेषशेषित्वमिदानीं चिंत्यते। भिन्नानां हि तत्संभवति न
भिन्नानामिति भेदलक्षणस्य हेतुत्वं। यद्यपि व्रीहीनवहंति सोमेन यजेतेत्यादिषु द्रव्यकर्मणां शेषशेषिभावो न कर्मभेदा
पेक्षस्तथापि कर्मणामपि प्रयाजाग्नेयादीनां शेषशेषित्वमिहैव वक्ष्यमिति तत्सिद्ध्यर्थं भेदलक्षणापेक्षणं। ननु व्री
ह्यवघातस्यापि व्रीहिभिर्यजेतेति शास्त्रांतरार्थं न शेषशेषित्वचिंता न व्रीहिपदार्थमात्रेण शास्त्रभेदलक्षणं च पूर्ववृ
त्तमिति न वर्तिहेतुत्वं। किं व्रीहीनवहंति व्रीहिभिर्यजेतेत्यनयोः शास्त्रयोर्भेदोऽस्ति। ओमिति चेत् न खलु न तावन्निर
पेक्षसाध्यभेदोऽत्रास्ति नाप्यनुबंधभेदो येन शास्त्रभेदः स्यान्न साकांक्षत्वमेवात्र न शास्त्रांतरत्वेन च वाक्यभेदल
क्षणं सर्वं वृत्तं। सोमेन यजेतारुणया क्रीणातीत्यादिषु वाक्यांतरत्वमपि नास्ति दूरादेव शास्त्रभेदः। ननु तत्रा
पि ज्योतिष्टोमेन स्वर्गकामो यजेतेति शास्त्रांतरविहिताधिकारसंबंधस्यैव यागस्य शेषः सोमः। न सोमज्योति
ष्टोमवाक्ययोरनुबंधैरनुबंधसाध्यभेदोऽस्ति न यत्रापि सोमयागस्यैव विषयत्वेनानुबंधभेदाभावात्तन्निर
पेक्षसाध्यभेदाभावाच्च उद्भिदा यजेत पशुकामः सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इत्यादौ स्ववाक्यत एव फल
यागस्य उद्भिद्देवतस्य च यागे शेषत्वमिति वाक्यांतरत्वमपि नास्ति तथैकस्मिन्नेव पदे प्रत्ययार्थभावनां
अपूर्वं वा प्रति प्रकृत्यर्थस्य यागस्य शेषत्वात्पदभेदोऽपि नास्ति न तरां वाक्यभेदः न तमां च शास्त्रभेदः। तस्मात्क २
र्मणामेव शेषशेषित्वचिंतार्थं भेदलक्षणापेक्षणं इतोऽपि न शास्त्रभेदापेक्षा। तद्भावेऽप्यवघाताग्नेया
दीनां शेषशेषित्वात्। तस्मात्कर्मभेदाद्धेत्वाषरोमेवेत्। नानाकर्मलक्षणं वृत्तमिति न तद्वारम्भाःस्त्रभेदा

हे

गुणाभाषणं । तस्येहानुपयोगात् । अत एव कर्मभेद एवं सर्वाध्यायार्थो न शास्त्रभेदः सौत्रेण चातः शब्देन पूर्ववृत्त
स्य हेतुत्वमुच्यते [illegible] कर्मभेदस्यौत्सुस भवति । न शास्त्रभेदस्येत्युक्तं । अतः सूत्रभाष्यविपरीतं शास्त्रभेदस्य
व्याख्यार्थत्वं । अयुक्तं च । अनुबन्धोत्तराद्धि बुध्यमानस्तदनुबद्धं नियोगान्तरमेव बुध्यते न मध्ये शास्त्रभेदं अतो
नासौ वेदार्थोऽचोदनार्थश्च न विचारमर्हतीति मतिर्नैव नाचारार्थभेदलक्षणापेक्षणं इत्यास्तां तावत् । बहु
प्रकारं वेदे शेषलक्षणं वक्ष्यते कः शेष इति तत्स्वरूपं केन हेतुना शेष इति शेषो भवति प्रवृत्तिनिमित्तं कथं नियुज्य
त इति विनियोगप्रकारः श्रुत्यादीनि च विनियोगे शेषस्य शेषिणा सहान्वयबोधने कारणानि प्रमाणानि
तेषां च विरोधे बलाबलं विरोधश्च क्वास्ति क्व च नास्ति तदेतत्सर्वमभिसन्धाय शेषलक्षणं वक्ष्यामीति सू
चितं । तदनेन सूत्रेण श्रोतृबुद्धिसमाधित्सया वक्ष्यमाणार्थप्रदर्शनमात्रं कृतं नात्र पूर्वपक्षप्रयोजनं ।
॥ ॥ २ ॥ शेषः परार्थत्वात् । उक्तं शेषलक्षणं वक्ष्यत इति तदिदमुच्यते प्रथमं तावदनेन सूत्रेण शेषत्वस्यो
सूत्रे हेतुश्च श्रुत्यर्थस्यानुच्यते । तत्र श्रुत्या हेतुरुच्यते परार्थत्वाच्छेष इति स्वरूपं तु अर्थात् यदि परार्थं शेषस्व
रूपप्रवृत्तौ हेतुस्तदा परार्थ एव शेष इति सिद्धं भवति । भाष्ये तु यः परार्थः स सर्वः शेष इति श्रुम इति स्वरूपं श्रुत्यो
क्तं अर्थान्तु हेतुरिति द्रष्टव्यं । अत्र चाविनाभावादिलक्षणाभासनिराकरणाय परार्थलक्षणमुच्यते । कि
ञ्चित्किल येन विना यन्न भवति बीजादिनेवाङ्कुरादिः स बीजादिस्तस्याङ्कुरादेः शेष इत्याहुः । तदयुक्तं ।
रूपरसादीनामाग्नेयादीनां चाभिथोऽविनाभावे शेषत्वापत्तेः अन्योन्यस्य शेषत्वाभि त्येतदपि पुरोडाशा

शा॰दी॰२

शब्दान्तरं
अभ्यासः
गुणः
संख्या
संज्ञा
प्रकरणं
इति षट् कर्मभेदकानि

2

कपालादिष्वप्रयोजकेष्वपि शेषत्वसंभवादव्यापकं। अन्ये तु यद्यस्मादधिकं विधीयते स तस्य शेष इत्याहुः
तदपीमदं। अंगप्रधानानां परस्पराधिक्यात्। अन्ये तु विध्यंगविहितत्वं शेषत्वमाहुः। तदपि विध्यादिविहिताना
मपि शास्त्रवाक्छेदादिनांगत्वदर्शनादयुक्तं। तस्मादुपकारित्वमेव शेषत्वमित्यन्ये। तदप्ययुक्तं। प्रधानान्य
प्यंगानामनुष्ठानोपयोगं कुर्वन्ति शेषत्वं गच्छेयुः तस्मात्पारार्थ्यमेवैकं युज्यते शेषलक्षणं। परोद्देशप्रवृत्तिश्च
पारार्थ्यमभिधीयते। कथं तर्हि श्रुत्यादिलक्षणं शेषत्वं नहि सोमेन यजेतेति तृतीयया परोद्देशप्रवृत्तत्वं
सोमस्योच्यते। कारणमात्राभिधानात्। उच्यते। न श्रुत्यादयः पारार्थ्यमभिदधातीति ब्रूमः। किं तर्हि विधि
सहिताः पारार्थ्यं बोधयन्ति। ननु विधिरपि नाभिधानेन पारार्थ्यं गमयति किं त्वर्थापत्त्या सद्विचेतनप्रवर्त्तना
त्वात्मभावो नानुद्दिष्टफले व्यापारे चेतनः प्रवर्त्तयितुं शक्यत इत्यर्थाद्विधिविषयस्य व्यापारस्य फलोद्देश
प्रवृत्तता गम्यते फलार्थश्च व्यापारः फलवदेव पुरुषस्य। नहि तल्लिप्सितमिति तत्साधनत्वेन श्रुत्यादिभिर
वगतानां तत्साधनत्वेनैव विधीयमानानां सोमादीनामपि तदुद्देशप्रवृत्तिः सिद्धा भवति। तस्माद्युक्तं
श्रुत्यादिसिद्धमप्यपारार्थ्यलक्षणं शेषत्वमिति॥२॥ ॥द्रव्यगुणसंस्कारेषु बादरिः॥ ॥अथ शेषत्वस्य वि
षयकथनेन कः शेष इत्ययमंशः प्रपञ्च्यते। बादरिर्द्रव्यसंस्कारगुणेष्वेव हि शेषतां श्रुत्यादेर्दर्शनाद्वो
ते कर्मणामनुपकारकाः। उपकारकत्वमेव शेषत्वं न पारार्थ्यं। तस्य बोधकाभावात्। विधेस्तावत्प्रवर्त्तना २
मात्ररूपः न तादर्थ्यं गमयति। श्रुत्यादयोऽपि साध्यसाधनभावमात्रपराः। न तादर्थ्यं प्रतिपादयन्ति। तस्मा

अत एव न पुरुषस्य शेषिता शेषत्वं तु तस्य द्रव्यत्वादिष्टमेव। तस्माद्द्रव्यगुणसंस्कारेष्वेव शेषत्वम् ॥ ५

दुपकारकत्वमेव शेषत्वं। तच्च दृष्टार्थानां द्रव्यगुणकर्मणां दर्शनादेवावगम्यते। प्रोक्षणादीनां तु श्रुत्यादिभि
र्द्वितीयादिविभक्तिभिः प्रोक्षणं प्रति साध्यत्वमभिदधानोपक्रमकमंतरेण तदनुपपत्तेरुपकारं गमयति। न तु या
गस्य फलं शेषत्वे प्रत्यक्षदर्शनश्रुत्या द्वयोर्वा संभवंति। यजेतेति यागः कर्तव्य इत्येतावदुच्यते। न तु यागेन
फलमिति। तदेतत्स्वर्गकामाधिकरणपूर्वपक्षे वक्ष्यामः। स्वर्गोपि काम्यमानाऽनेन शब्देनोच्यते। न ता
दार्थ्यः परार्थो वेति। तस्मान्न तयोः शेषत्वमिति तदेतत्स्वर्गकामाधिकरणपूर्वपक्षवादिनो बादरेर्मतं।
जैमिनिस्तूपकारलक्षणस्य शेषत्वस्याक्रतौ शेषत्वात्पारार्थ्यमेव शेषत्वं। तच्च विधिगम्यमिति। स्वर्गका
माधिकरणे सिद्धांतेव क्ष्यमाणमभिप्रेत्य कर्मणामपि पारार्थ्यात् शेषत्वमाह। तदेतत्तंत्रसिद्धमिति ना
त्र किंचित्प्रतिपाद्यं। प्रपंचमात्रं लिह पूर्वोक्तशेषत्वविषयस्य क्रियते। प्रपंचं तु कुर्वन्परमतोपन्यास
पुरःसरं स्वमतमुपन्यस्तवान्। एवं फलस्यापि पुरुषशेषत्वं कामवशादेवावगम्यते विधिवशाच्च। न
ह्यन्यार्थं कश्चित्कामयते। यदपि परार्थं कामयते तदपि परंपरया स्वार्थमेव। अत्र तु परंपराप्रमाणाभा
वादात्मार्थतयैवावगम्यते। विधिश्चानात्मार्थफलसाधने प्रवर्तयितुमसमर्थः कुर्वन्फलस्यात्मार्थतां गम
यति। यजेतेति चात्मनेपदनिर्देशात्। तस्माद्यागफलस्यापि शेषता। ततश्च पुरुषस्यापि शेषित्वं।
न चैवं सर्वतः प्रधानत्वात्पुरुषस्य शेषत्वं नास्तीति मंतव्यं। आख्यातेन कर्तृगुणत्वेनोपादानात्।

न्या.त.२ औडुंबरीसंमानादिषु तु अत्यैव गुणत्वात्॥ ॥तेषामर्थेन संबंधः॥ ॥कः शेषः केन हेतुना शेष इति द्वयमन
युक्तं। इदानीं कथं विनियुज्यत इत्ययमंशो निरूप्यते। दर्शपूर्णमासयोर्निर्वपणप्रोक्षणावघातादय औ
षधधर्माः। उत्पवनादय आज्यधर्माः। शाखाहरणादयः सान्नाय्यधर्मा इत्युक्ता। तेषु संशयः। किं सर्वे औ
षधे आज्ये सान्नाय्ये च कर्तव्याः उत यथायोगं व्यवस्थेति। तदर्थं च किं परमापूर्वयुक्ता एव किं वा अवांत
रापूर्वप्रयुक्ता इति। तस्मिन्नप्यर्थमपि किमवांतरापूर्वाणि संति न वेति। संत्यपि च तेषु किं तानि प्रयोजका
नि किं वा परमापूर्वं। यद्यपि तानि तदापि किं सर्वाणि सर्वेषां प्रयोजकानि किं वा व्यवस्थेति। किं प्राप्तं। एक
मेव फलापूर्वं फलस्यैकस्य सिद्धये। कल्प्यं नान्यानि धर्माणां तादर्थ्यात् संकरो भवेत्। अवघातादीनां व्री
ह्यादिभिः संबंधो पूर्वसाधनविशेषलक्षणो न व्रीह्यादिस्वरूपकृतः। तथा पूर्वं सर्वेषामाग्नेयादीनामे
कफलसाधनत्वादेकमेव कल्प्यते न बहूनि तदर्थमवघातस्तदीये हविषि कर्तव्यस्तदीयत्वं चाज्या
दीनामप्यविशिष्टं। अतो यथा व्रीहिषु कृतोवघातो यवेष्वपि स्युर्भवत्येवमाज्यादिष्वपि संभवितुमर्हति। सं
तु वा अवांतरापूर्वाणि तथापि तानि निःफलत्वाद्यागस्वरूपवदेव न धर्माणां प्रयोजकानि। परमापूर्वं
तु फलवदतस्तदेव प्रयोजकं। न चावाद्भिर्यमन्याय्यः। तत्र दर्शयाशाब्दो दीक्षणीयापूर्वेण लक्षणयोप
स्थापयति। ज्योतिष्टोमापूर्वेण तुल्यसिद्धत्वाल्लक्षणैः तेषामस्ति विप्रकर्षः। अत्र तु परमापूर्वमवांतरापूर्वं च द्वय

नप्याग्नेयादिसाध्यमितिनलक्षणायां विशेषः। प्रधानत्वाच्च परमापूर्वमेवप्रयोजकं युक्तं। यद्यपिचावांतरा
पूर्वाण्येवप्रयोजकानितथापिप्रकरणाविशेषात्सर्वाणिसर्वेषांप्रयोजकानितस्मात्संकर इति। अत्राभि
धीयते। सत्यं तावदवांतरापूर्वाणि। कुतः। नह्याग्नेयादिकर्माणि विनाशीनि तैर्विना। संहत्यपरमापूर्वं जन
यंतिस्वरूपतः। तदेतदपूर्वाधिकरणएवानागतावेक्षणन्यायेनप्रतिपादितं। सत्सुचतेषु नादृष्टार्थमेवावघा
तादेर्युक्तं प्रत्यासत्तेः। यद्यपिचाग्नेयादीन्येवोत्पत्त्यपूर्वकारणं तथापि सन्निधानादुत्पत्त्यपूर्वे कारणं। तद्द्वारेणतु
परमापूर्वे। संबंधनिमित्तावलक्षणा। तेनव्रीहिशब्दो यागद्वारेणपूर्वमुपस्थापयन्प्रथमं तावदुत्पत्त्यपूर्वे नि
पतति। तस्यापिचादृष्टत्वेनाज्ञातप्रकारत्वात्परमापूर्वसिद्ध्यौपयिकत्वेन च फलवत्त्वादतिक्रमकारणा
भावात्तादर्थ्यमेवावघातादेर्युक्तं। सत्यपिचसर्वेषां प्रकरणाविशेषे कृते बलीयस्त्वावगमादसंकरः। ए
वंचावघातादेर्दृष्टार्थता भवति। अन्यथात्वदृष्टार्थतास्यात्। नच क्वचिदपिदृष्टार्थसंभवे ततएवविद्ध्यु
पपत्तेरर्थापत्तिपरिक्लृप्तमादृष्टकल्पनयास्वर्थत्वं युक्तं। अतश्चयद्यपितावदवहंतीत्येतावन्मात्रं श्रू
येत। तथापिदृष्टार्थवशादेवव्यवस्थास्यात्। किंतु तयदाव्रीह्यादिसंयोगेनैवश्रवणं। तस्माद्यथासंयो
गंव्यवस्था॥ ॥द्रव्यंचोत्पत्तिसंयोगात्तदर्थमेवचोद्येत॥ ॥ दर्शपूर्णमासयोः स्फ्यश्च कपालानिचे
त्याद्युपक्रम्यैतानि वै दशयज्ञायुधानीतिश्रुतं। तथा स्फ्येनोद्धंतीत्यादीन्यपराणि वचनानि। तत्र संशयः।
किंस्फ्यादिनायेनयदस्मिन्प्रकरणेशक्यं तत्सर्वं तेनकर्तव्यं उत यथायोगं मुद्गननादेवेति। तत्रायुध

शा॰टी॰२ शब्दस्य साधनवचनत्वाद्द्रव्यसाधनत्वं गम्यमानं साक्षादसंभवदंगेष्ववस्तरदविशेषात्सर्वांगेषु विधीय
ते। उद्धननादिसंयोगस्त्वनेनैव प्राप्तत्वादवघुस्यानुवादः। नैतद्युक्तं। एवं हि बहूनामुद्धननादिवाक्याना
मानर्थक्यं स्यात्। न चानुवादत्वमपि संभवति नित्यप्राप्त्यभावात्। नह्युद्धननं स्फ्येनैव प्राप्तं। अन्येनापि संभ
५ वात्। पाक्षिकानुवादे वा नित्यवत्कुर्वाण विरोधः। तस्मादेतानि वाक्यानि विधायकानि। यज्ञायुधवाक्यं त्वेतैरे
व प्राप्तार्थत्वात्। वैशब्दोपबंधादाख्याताभावाच्चानुवादकं। वरं च बह्वानर्थक्यादेकानर्थक्यं। न चास्यान
र्थक्यं। यज्ञायुधानि संभरंतीत्यनंतरस्कृतासादनविधिशेषत्वात्। तस्मादस्यानुवादत्वादितरे विधयो म
ताः। तेन स्फ्यादेर्व्यवस्था स्यात्कार्येषूद्धननादिषु॥ ॥अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यात्॥ ॥
ज्योतिष्टोमे श्रूयते। अरुणया पिंगाक्ष्यैकहायन्या सोमं क्रीणातीति। तत्रारुणशब्दोयमारुण्याधिक
रणन्यायेनान्वयव्यतिरेकाभ्यां च गुणवचनः। पिंगाक्ष्येकहायनीशब्दौ यौगिकौ सामानाधिकरण्या
देकद्रव्यवचनौ गुणाधिकाफलं च शब्दश्रेयं। न चैकेन विहिते परेण। विधिर्न संभवतीति वक्तव्य
मुभयोरपि श्रुत्यैव द्रव्यवचनयोर्युगपत्प्रवृत्तेः। न हि हायनीमानं प्रति संदेहः। किमेनं वाक्याद्धृ
त्वा प्रकरणेन सर्वद्रव्येषु निवेशयामः। किं वा क्रमेणासंबध्यतदंगं सदेकहायन्यां निविशत इति। ४
तदर्थं च। क्रियासाधनत्वं संभवति नेति। तत्र। अमूर्तत्वाद्गुणेनैव क्रियां साधयितुं क्षमः। तस्मात्क्री

णातिनान्मन्नैः स्य संसव त्येकवाक्यता। क्रीणातिना संबध्यमानस्तृतीयया संयोगात्करणकारकं स्या
त्। न चास्य तस्य करणकारकत्वं संभवति क्रीणिनास्य क्रयसंबंध इति ततः पृथग्भूतः प्रकरणे निविश
त इति। ननु शब्द प्रकरणे वाक्यमस्य निवेशः। ननावक्रियायास्तिरमूर्तत्वात्। न चेद्द्रव्यैः कारकस्य द्रव्य
संबंधानुपपत्तेः। अनुपात्तानि चात्र द्रव्याणि कथं तैर्गुणः संबध्येत। स्यादेतत् तृतीयया करणद्रव्याणि प्र
करकान्यन्यस्य प्रातिपदिकार्थो गुणस्तत्परिच्छेदकत्वेन विधीयते न तु गुणस्य करणत्वं येन द्रव्यसंबंधो
न स्यात्। तृतीयया चोपादानाद्द्रव्याणां नानुपादानदोष इति। नैतद्युक्तं। न हि तृतीयाकरणीभूतद्रव्या
भिधायिनी विभक्तयो हि कारकत्वात्कं निष्कृष्याभिधायितया क्रियां विशिंषन्ति। ननु यद्यपि करणा दिवा
द्वत्कारकोपसर्जनं द्रव्यमभिदधाति येन गुणः परिच्छेदकतया संबध्येत। उच्यते। प्रातिपदिकमे
व गुणवचनमपि लक्षणया द्रव्यं प्रतिपादयति तच्च तृतीयासंयोगात्करणं तदंतेन पदेन तु गुण
विशिष्टं द्रव्यं करणरूपं प्रतिपाद्यते तत्र विशेष्याणि करणद्रव्याणि प्रकरणगतान्यनूद्य विशेषण
भूतो गुणः परिच्छेदकत्वेन विधीयते। येन द्रव्येण किं चिच्छेद्यते तेनारुणगुणकेनेति। नन्वेवं सति
त्व तस्य द्रव्यस्य क्रय एव करणसंबन्धो वा किमिति वाक्यभेदः। नानेकलक्षितं द्रव्यांतरं शक्यं विधातुं।
श्रौतैकहायन्यवरुद्धत्वात् क्रयस्य। एकहायनी तु स्वशब्द विहिता न पुनर्लक्षणया विधातुं शक्यते।

रा·त·१

अथैकहायनीमेवानूद्य तत्रैव गुणो विधीयते न भविष्यति वाक्यभेदः। नैवं शक्यं विधीयते ह्यत्रैक-
हायनी क्रयं प्रति गुणभूता च स्वार्थं विना सा वै कस्मिन्नेवोच्चारणेनुवदितुं गुणो प्रति प्रधानीभवितुं
परार्थं चोच्चारयितुं शक्यते। आवृत्तिप्रसंगात्। प्राक् इति कानि द्रव्याणि वाक्यान्तरविहितानि शक्यं ड
ते वाक्यान्तरेनुवदितुं। तस्मात्त्वस्मिन् प्रकरणे अरुणिमा निविशत इति प्राप्ते ब्रूमः॥ तृतीययारुण-
स्यैव करणत्वं क्रयं प्रति। विस्पष्टं गम्यते तत्स्च द्रव्यद्वारेण युज्यते। यद्यप्यमूर्तत्वादस्य न साक्षात्क्रि-
यां साधयितुमलं तथापि द्रव्यपरिच्छेदमुखेन शक्नोति साधयितुं। न ह्यपरिच्छिन्नं द्रव्यं क्रियां साध-
यति गुणश्च तत्परिच्छिनत्तीति युक्तमस्य क्रियासाधनत्वं। गुणो हि साधनत्वेन विदधद्बद्धो यथानेन श-
क्यते साधयितुं तथा कुर्यादित्याह। स चासौ द्रव्यपरिच्छेदमुखेन शक्नोति साधयितुं नान्यथा। तेनाय-
मर्थो भवति। अरुणगुणपरिच्छिन्नेन द्रव्येण कुर्यादिति। एवं संभवति श्रौतस्यैव गुणस्य क्रयैक-
वाक्यत्वेन लक्षणावाक्यत्वेदस्य युज्यते। यदा च क्रयार्थत्वं तदा तदीयस्त्वद्रव्ये निवेशादेकहायन्या-
मेव निवेशः। ननु वासःप्रभृतीन्यन्यान्यपि क्रयद्रव्याणि तेष्वपि निविशेत। न। तेषां क्रयान्तरद्र-
व्यत्वात्। भिन्ना ह्येते प्रतिवाक्यं क्रयाः विधिभेदात्। सर्वे ह्येते विधयोऽन्योन्यस्मिन्नुत्पत्तिशिष्टद्र-
व्यावरोधाद् द्रव्यान्तरविधानसमर्था न तु वेतस्त्वत्र द्रव्यविशिष्टक्रयविधानार्थाः। न च विहितस्य विधानं

5

संस्नवतीतिसिद्धः क्रयभेदः। तदाह भाष्यकारः। एकहायन्या साधनक एकः क्रयो व बुद्धौ भवति अरुणासाधन
कमपि क्रयांतरमिति एवं हि विदन्वाक्यभेदे क्रयभेदं दर्शयति। तेन ये गुणकर्मत्वात् क्रयाणां भेदं नेच्छंति ते न्याय
विरोधाद्भाष्यविरोधाच्चोपेक्षणीयाः। न च गुणकर्मणां भेदो नास्तीति शङ्क्यं। एवं वायव्यादिग्रहणानां
भेदस्य पशुसोमाधिकरणे दर्शितत्वात्। अतोस्ति क्रयभेदः। क्रयणेषु तु विकल्पः स्यादित्यत्राधिकरणे क्र
याणामेवाविकल्पसमुच्चयचिंता न द्रव्याणामित्यविरोधः॥ ॥ एकत्वयुक्तमेकस्य श्रुतिसंयोगात्॥
एवं विनिर्णीते कर्मणां क्रमेण संस्कारद्रव्यगुणानां यथासंयोगं व्यवस्था कृता। संयोग एव त्विदानीं चिंत्य
ते। किं विवक्षितविशेषणेन चोदितेन शेषस्य संयोगः किमु विवक्षितविशेषणेनेति। एवं ग्रहं सं
मार्ष्टीति। तत्र संशयः। किमेकस्य ग्रहस्य संमार्गः उत सर्वेषामिति। तदर्थं किमुद्देश्यगता संख्या विव
क्षिता नेति। तत्र श्रुतिबलाद्धि संख्योपादेयगामिनी। विवक्षिता तथोद्देश्यगतोप्युक्तविशेषतः। इति
प्राप्ते निधीयते। उद्देश्यलक्षणं ज्ञाप्तिर्यद्द्रव्यं लक्ष्यते तया। तत्संयोगमेव संमार्गः सर्वस्येति विनिश्चयः।
यदि ग्रहत्वजातेरयं संस्कारः स्यात्तत्तस्याः प्रतिव्यक्ति समाप्तेर्यत्र क्वचिद्द्रव्ये संस्कृते सा संस्कृतैवे
ति न द्रव्यांतरे संस्कारः क्रियेत। तस्यास्त्वमूर्तत्वादसाधनत्वाच्च तदवच्छिन्नानां द्रव्याणां ज्योतिष्टोमो
पूर्वसाधनानामयं संमार्गः। तत्रापि यदि द्रव्याणि संमार्गं प्रति गुणान्तरतानि स्युः पशुरिव यागं प्रति। ततो

ग्रा-त-१ वैमकेनापि सिद्धेर्नावृत्त्यं सर्वत्र क्रियेत । न हि यावद्गुणं प्राधान्यमावर्त्तयितव्यं । प्रयोजनाभावात् तत्स्थ कियता
द्रव्येण । यः संमार्गः कर्त्तव्य इत्यपेक्षा भवति । तस्यां चापेक्षायां परिच्छेदकत्वेन संख्या विधीयेत । एकैकस्यैव
प्रधानानि त्विह द्रव्याणि संमार्गं प्रति द्वितीयानिर्देशात् प्रयोजनवत्त्वाच्च । प्रतिप्रधानं च गुणावृत्तेः सर्वेषां
6 समुच्चितानामयं संस्कारनिष्पत्त्यात्परिच्छेदकापेक्षा तदभावाच्च न संख्या आदर्त्तव्या । परिच्छेदकतया
हि तस्याः क्रियान्वयो न च परिच्छेदः । परिच्छिन्ने संभवतीति द्वाराभावान्न क्रियान्वयः संख्यया । विधातुं श
क्यते । विधीयमानमप्येकत्वं सर्वद्रव्येषु समुच्चयेन संमार्गे प्राप्ते परिसंख्यार्थं स्यात् सा च त्रिदोषा
न चैकस्मिन् वाक्ये संमार्गविधिः परिसंख्या च संभवति । वचनव्यक्तिभेदात् । न चास्य विधिरपि संभ
वति कुतः । ग्रहस्य संमृष्टे वैतत्प्रधानं गुण एव वा । सर्वथा वाक्यभेदः स्यात् । ततो नां विधेयता । विधीयमा स्य
नं ह्येकत्वं तावद्ग्रहस्य द्रव्यस्य विधीयते ततो ग्रहसंमार्गसंबंधो ग्रहैकत्वसंबंधश्चेत्यर्थद्वयविधानाद्वा
क्यभेदः स्यात् । विहितमपि चैकत्वं ग्रहस्वरूपमात्रोपलक्षणात् संमार्गविशेषणमिति सर्वेषां संमार्गस्या
दिष्टस्य तत्पक्षाविरोध एव । अथ संमार्गान्वितस्य ग्रहस्यैकत्वं विधीयते न स्वरूपमात्रस्य । नैवं वाक्यं । न ६
हि संमार्गो ग्रहविशेषणं । निर्ज्ञातं हि विशेषणं भवति । संमार्गस्त्विहापूर्वो विधीयते । कथमसौ ग्रह
विशेषणं । युगपद्वा विधानविशेषणत्वयोरभ्युपगमे वाक्यभेदः । ग्रहं संमृज्याद्ग्रहं संमृज्यात् स एकत्वेति ।

अथैकत्वविशिष्टस्य ग्रहस्य संमार्ग एकोर्थो विधीयते। नतेन कश्चित्सर्वोक्तो दोषस्यादितिमतं। कस्तदास
वतिवाक्यार्थः। यद्ग्रहजातीयमेकसंख्यं चद्रव्यं तस्य संमार्ग इति। एवमपि सर्वं प्रत्येकमेकत्वाद्ग्रहत्वा
त्संमार्गस्य च तद्गुणत्वात् सर्वत्र प्राप्तिः स्यात् अपि च विभक्त्या युगपत्संख्याकारकं लक्षणोच्यते। ननु प्रथमं
संख्यां प्रातिपदिकार्थे विधाय पश्चात्तद्विशिष्टस्य कारकत्वं। येनैकत्वविशिष्टस्य ग्रहस्य संमार्गं प्रति
कर्मता स्यात्। तन्न तावदेकत्वं ग्रहविशेषणं। अथवा एतदपि पश्चैकत्ववद्विभक्त्युक्तस्या कारकं सक्रिय
येव संबध्यते। तत्रापि द्वयी गतिः स्यादेकत्वस्यांगं संमार्गः संमार्गांगं चैकत्वं। यदि तावदेकत्वांगं संमार्गः
स्यात्ततो ग्रहमेकत्वं चोद्दिश्य संमार्गविधानाद्द्वे द्वयं यदधीनोपादेयं च क्रियया वशीकरणसंभवात् प्रत्ये
कमेव ताभ्यां क्रियासंबंधात्प्रत्युद्देश्यं वाक्यसमाप्तेर्वाक्यभेदः। पुनरपि च ग्रहस्यैकत्वानपदिष्टस्यैव संमा
र्गात् सर्वग्रहसंमार्गः स्यादित्यस्मत्पक्षसिद्धिः। अथैकत्वसंमार्गस्य गुण इत्युच्यते। तदयुक्तं। नहि द्विती
या गुणत्वं वदति प्राधान्यवादिनी हि सा। अथ सक्तुवल्लक्षणया गुणत्वमुच्येत। न श्रुतिसंभवे सा युक्ता।
किंच। तथा सति ग्रहस्यापि गुणत्वं स्यात् अथैकत्वस्य गुणत्वं ग्रहस्य च प्राधान्यमुच्येत। तन्न कथंचिदेकत्वं
विवक्षितुं शक्यं॥ ॥संस्काराद्वा गुणानामव्यवस्थानात्॥ ॥किमेकत्ववत् प्रातिपदिकार्थस्याप्यविवक्षि
तत्वाच्चमसानामपि संमार्गः कर्तव्यः उत विवक्षाकारणाभावाद्ग्रहाणामेवेति विचारः। तत्र संमार्ष्टीति

शा॰ ८॰ २ तावदुक्तेः सोमावसेकनिर्हरणप्रयोजनतया सोमपात्राणामित्यवगमात् तद्रूपः कस्येत्यपेक्षायामवादवद्विवक्षि-
तं ग्रहग्रहणमेकत्वं तूपलक्षणमात्रं। अपिच सोमयागस्यैकत्वात्तदपूर्वमेकमेव। तस्माद्धुन निवेशो
संमार्गस्य चमसेष्वपि तत्साधनेषु भवितुमर्हति। न ह्यत्र कर्मभेदोस्ति येनापूर्वभेदाद्व्यवस्थातादिवद्व्यवस्था
7 स्यात्। तस्माच्चमसेष्वपि स्यादिति प्राप्ते निधीयते॥ न ह्यत्र विवक्षायां वाक्यभेदः प्रसज्यते। यागैक-
त्वेप्यपूर्वाणि भिद्यंते ऽभ्यासभेदतः। न तावदेकत्वविवक्षायां बहुत्वविवक्षायां वाक्यभेदो वक्ष्यते हि संमार्गः
कस्यचिद्विधातव्यः। तत्र शब्दोपनीतं ग्रहमुल्लंघ्य न युक्तं यत्सामर्थ्यलभ्यं सोमपात्रमात्रं गम्यते। एक-
स्यापि च यागस्याभ्यासभेदात्तेषां चापूर्वमंतरेण संहृत्यकारित्वायोगादवश्यं प्रत्यभ्यासमपूर्वाणि भि-
द्यंते। ततश्च ग्रहशब्दोपलक्षितापूर्वविशेषनिबंधनः संमार्गो न चमसेषु कर्तव्यः॥ ॥अनर्थक्यात्तदंगेषु॥ ॥
सप्तदशारत्निर्वाजपेयस्य यूपइति श्रूयते। तत्र संशयः। किं सप्तदशारत्नित्वं वाजपेयसाधनभूतोर्ध्व-
पात्रद्वारेण वाजपेयांगं उत यूपद्वारेण पश्वंगमिति। तदर्थं च किं सप्तदशारत्निर्वाजपेयस्येति वचनव्य-
क्तिः उत सप्तदशारत्निर्यूप इति। तत्राव्यवहितत्वात्प्रधानत्वात्प्रकरणानुग्रहाच्च सप्तदशारत्निर्वाज-
पेयस्येति संबंधः। परिमाणं च साक्षात्कर्मणि न संभवतीति तत्साधनभूतोर्ध्वपात्रद्वारेण संबध्यते।
यूपशब्दश्चोर्ध्वपात्र एव साहचर्याद्वर्तते। यद्वा वाजपेयस्येति षष्ठ्या तत्संबध्यूर्ध्वपात्रमुद्दिश्य सप्तदशा-

रशनात्वं विहितं तद्द्वारेण वाजपेयाङ्गं भवति। एवं च वाजपेयशब्दः श्रुतिरेव भवति। यूपसंबन्धे तु वाजपेयस्य
यूपता स्याद्वा पशुयाग संबन्धित्वाद्यूपस्य वाजपेयशब्दः पशुलक्षणार्थः स्यात्। नन्वितरत्रापि यूपशब्दो गौ
णः। सत्यं न दोषोऽन्यथानुपपत्त्या यूपशब्दस्य। वाजपेयशब्दस्य तु मुख्यत्वान्न लक्षणा युक्ता। तस्मादूर्ध्वपात्रेऽनि
वेशः। स्यादेवं यदि यूपेन संबन्धे लक्षणा भवेत्। वाजपेयश्रुतेर्नासौ श्रुतिरत्रैवसीयतः। षष्ठीसंबन्धमा
त्रार्थानां गौणत्वमपेक्षते। नाप्यव्यवधिसंबन्धं देवदत्तस्येव न स्याद्वत्। यूपस्य च पशुद्वारा वाजपेयोपका
रतः। संबन्धमात्रमस्त्येव क्रतुना तेन न लक्षणा। ऊर्ध्वपात्रेण संबन्धे यूपशब्दस्य गौणता। अनन्तरेण सं
बन्धः प्रधानेन च संगतिः। प्रक्रियानुग्रहश्चैव नादृत्या श्रुतिबाधतः। तेन सप्तदशारत्निर्यूप इत्येव सं
गतिः। सा च प्रकरणाद्वाजपेयसंबन्धियूपगा। तेनायं वाजपेयस्यैवानुवादो भविष्यति॥ ॥ कर्तृगुणे तु
कर्मासमवायाद्वाक्यभेदः स्यात्॥ ॥ दर्शपूर्णमासयोः प्रयाजसमीपे श्रूयते। अभिक्रामं जुहोतीति।
तत्र भाष्यकारेण जुहोतेः संनिहितप्रयाजविषयत्वं सिद्धं कृत्वा किमभिक्रमणं तेनैकवाक्यस्तत्र के चासं
बध्यते। किं वा ततो भिन्नं कृत्स्नप्रकरणकर्त्रेति विचारितं। एवं च पूर्वः पक्षः। क्रियया कारकस्यैव नान्यस्या
स्यैकवाक्यता। न चाभिक्रमणं मूर्तिविवर्जितं कारकं भवेत्। न चारुण्यवद्द्रव्यद्वारेण संभवति। तत्र ह्येक
हायनी द्रव्यमुपात्तं युक्तं यद्द्वारतां प्रतिपद्यते। अत्र तु जुहोतिना कर्तुरनुपादानान्न द्वारत्वं। तस्माद्भिन्नं

शा॰ टी॰ १ प्रकरणेन गृह्यते वाक्येन च क्रियायाः प्रकरणेन गृहीतं प्रयाजादिवत्। संवेत्तेति कर्मणः कर्मापि कारकत्वं। का
रकत्वेन तु न संभवति। तस्माद्दर्शपूर्णमासांगस्य सामर्थ्यात्कर्तृसंस्कारकं भवति। कर्त्ता च प्रयोगमात्रमिति
सर्वप्रयोगसंबंधो ऽभिक्रमणस्येति। सिद्धांतस्तु। अनुपात्तो विसद्भावमात्रेण द्वारतां व्रजेत्। कर्त्ता सिद्ध
मणं तेन न वे होमस्य साधनं। वार्त्तिककारस्तु। त्थो तमभिक्रमणं न क्रियातोन्येन संबध्यते। तस्माद्धु सानुक्तं
होतिसंबंधस्य स्पष्टत्वान्न ततो विच्छेदाशंकेत्यन्यथाधिकरणं वर्णयांचकार। अभिक्रामं जुहोतीति हो
मानुवादेन विधीयमानमभिक्रमणं किं प्रकरणिकसर्वहोमांगं उत प्रयाजहोमस्येति संशयः। तदर्थं च क्रि
मवांतरप्रकरणमस्ति न वेति। फलवद्भावनोद्भूतकथंभावतिरोहिताः। नैवांगानां तिरोभावाः प्रादुः
ष्यंति तमेतराः। प्रादुःष्युर्यदि चांगानां कथंभावास्ततो मिथः। तेषामंगांगितापत्तेरव्यवस्था प्रसज्यते।
तस्मान्नावांतरप्रकरणं तदभावे च संनिधिमात्रेणाभिक्रमणं प्रयाजांगं स्यात्। स च दुर्बलः प्रक
रणादतो दर्शपूर्णमासभावनया संबंधात् तदीयसकलहोमांगमभिक्रमणं बर्हिर्धर्मवत्। नन्व
सत्यप्यवांतरप्रकरणे वाक्येनैव प्रयाजांगता स्यात्। अभिक्रामं जुहोतीति। नैवं जुहोतेः साधार
णत्वेन प्रयाजोपस्थानाभावात्। नन्वनुवादोयं सन्निहितगामी प्रयाजाश्च संन्निहिताः। नैवं।
बुद्धिविपरिवृत्तिरनुवादस्यापेक्षिता न पाठप्रत्यासत्तिः। तथासत्यपि तत्संनिधानादुं नमप्रयाजस्यै

वातिक्रमेण मंगं स्यान्न सन्निधादीनां। तथा बर्हिषि हवींष्यासादयतीति यस्यैव हविषः क्रियानपि पाठतः
सन्निधिविशेषोऽस्ति तस्यैव बर्हिषि स्यादासादनं नान्येषां। वृद्धिविपरिवृत्तिश्च सर्वहोमानामविशिष्टा
प्रकृतत्वादेव। अतो बर्हिर्दर्विः त्राद्स्यैव जुहोतिशब्दस्यापि संकोचायोगात्सर्वहोमागममतिक्रम
णामिति। तत्र वेदेवं प्रयाजानां नास्ति प्रकरणं यदि। तेषां वचनसंयुक्तो ये गुणा विहिताः पुरा। प्रध्या
येयेविधास्यन्ते तैः संदष्टमिदं स्मृतं। असिकामं जुहोतीति न ततोन्यत्र गच्छति। प्रयाजान्विधायस
मानयत्रूप एतः इत्यादिगुणं विधायासिकामं जुहोतीत्युक्तो यो वै प्रयाजानां मिथुनं वेदसन्नि
धोवन्हीश्विनयज्ञतीत्यादिवत्प्रज्ञो यो निष्ठा हवींष्यासिघारयतीति प्रयाजपरामर्शादर्शनान्न न
मेनावता प्रदेशेन प्रयाजाः समाप्यंत इत्यवगमान्न तन्मध्यपतित न असिकमणं तदतिक्रमेणा
न्यत्र गच्छति। विधते चांगभावनानामप्यविज्ञातप्रकारत्वात्कथमित्याकांक्षा। तथापि। नवि
धते तु संदंशो यत्र वा चानिकैर्गुणैः। तत्रांगानां कथं भावः संनप्य विनियोजकः। निःफलत्वेन
सर्वेषां न विशेषोऽवगम्यते। कः शेषः कस्य शेषित्वमतः सर्वप्रधानतां। अव्यवस्था प्रसक्तिश्च
योक्तासैवं निराकृता। संदंशे सति संदष्टं तदंगमितरत्पुनः। सर्वप्रधानगामीति नाव्यवस्था प्रसज्यते।

मृ० त०

यस्त्वाह साधिकाराणामिति कर्त्तव्यता स्थिता। नान्येषामिति तस्यापि प्रतिज्ञामात्रमेव तत्। अविज्ञातप्रकारत्वादुत्तये
षां हि सान्नवेत्। तान्यपि ह्यनुष्ठेयानि न वेदमनुष्ठानमेव न स्यात्। एतावांस्तु विशेषो यदेषामन्यधर्मेनुष्ठानं सा
धिकाराणां तु स्वनिष्ठमिति। नैतावता विशेषोऽन्यार्थस्यापि अविज्ञातप्रकारस्यानुष्ठानासंभवात् प्रयाजादयोपू
र्वं कृत्वा प्रधानस्योपकुर्यादित्युक्ते यो नाम प्रयाजैरपूर्वं कर्त्तुं न जानाति तस्य तत्वत्येवं कथममीभिरपूर्वं क
र्त्तव्यमिति प्रकारविशेषापेक्षा। सत्यामपि तस्यां यदि संदेशापतितमंगं न स्यात् ततोऽविशेषात्सर्वं फलव
9 दंगं स्यात्। प्रकाराकांक्षा तु वाचनिके गुणे रथा चित्तिलस्येनच स्वरूपनिष्पादनेनावमनादि निश्च दविहोमवत्
पूर्यते। अतिक्रमणां तु संदेशापतितत्वादवान्तरप्रकरणाद् धृते: प्रयाजांगं एकदेशिनां त्ववान्तरप्रकरणाज्ञावाप्तसंनि
धिबाधनप्रकरणाविशेषात् सर्वार्थं स्यादित्यास्तां तावत्॥ ॥संदिग्धे तु व्यवायाद्वाक्यभेदः स्यात्॥ ॥दर्शपू
र्णमासयोः सामिधेनीर्विधाय तासां चात्रिः प्रथमामन्वाहेत्यादिवचनैर्गुणान्विधाय ततो निविदो नाम मंत्राः
देवेद्धो मन्विद्ध इत्यादयो विहिताः ततः काम्याः सामिधेनीकल्पा विहिताः तदनंतरं यज्ञोपवीतमाम्नातं तंप
प्रय तदेवलक्ष्ममेवत कुरुते इति ततः पुनरपि सामिधेनीनामेव वाचनिका गुणा विधास्यंते नंतरान्न संसदे
तायेत्यादयः तदत्रोपवीतं प्रति संदेहः। सामिधेन्यंगं उत तदर्शपूर्णमासांगमिति तत्र दर्शनाक्सामिधेनीनां वाच
निकगुणोत्तम वानरप्रकरणं उपवीताविधावनुवर्त्तते अथवा विच्छिन्ने ... मिदं निविच्छि
रिति। अनुवृत्तौ तदंगत्वं विच्छिन्ने दर्शविषयता। किंप्राप्तं समनुजयत्रापि कीर्त्तनादनुवर्त्तते। पुरस्तादुपवीतस्य

परस्तात्सापि कीर्त्तनं। विघ्नते सामिधेनीनां मूतः प्रकरणास्थिता। निविदः स्वरूपपाठानुमंत्रणमंत्रवत्पर प्रकरणपठिता
इत्यवगंतव्यं। अथवा निविदामपि तादर्थ्ये तत्कथं नावसंगते:। न चांगैर्व्यवधीयंते प्रधानानि कथंचन। काम्येष्ट्या
श्रयत्वेन तासामेवानुवर्त्तनं। नुपवीतमतस्तासामंगप्रकरणाद्भवेत्। एवं प्राप्ते वदामो त्र निविद्भिर्व्यवधानतः।
विच्छिन्ना सामिधेनीनां प्रक्रियानानुवर्त्तते। यस्तु सन्निधानस्यैवासंबंधिभिः पदैः व्यवधानेन प्रकरणस्यैति
वदत्तितस्य सर्वकर्मणां सर्वप्रकरणानुवृत्तेः स र्वे धर्माः सर्वेषामुपदेशेन वस्तुः विश्वजिदादीनामपेक्षत्वथवे
स्यात्तु यत्तु निविदामप्यवांतर प्रकरणे न सामिधेन्यंगत्वादव्यवधायकत्वमिति स्तु क्तं। तदयुक्तं। लिंगेन प्रकर
णं बाधित्वा निविदोग्निसमिंधनांगं भवति नाध चाग्निः सामिधेन्यंगं भवति येन वद्वारेण निविदापितदंगं स्युः।
दे किंतु सामिधेन्य एवाग्न्यंगं निविदोपि न तासां मिथः संबंधः। यथावस्थिति गुणानां च परार्थत्वादसंबंध इति तेन
संबंधिभिः निविद्भिर्व्यवधानं मासांगे विच्छिन्नं सामिधेनीनां प्रकरणं नोपवीतं गच्छति। न च वंनिविदंगमुप
वीतं स्यान्न तासां प्रकरणे सद्भावान्न तेषां विकृतित्वादिदृष्टिनिनिस्य सामिधेन्याश्रयये न गुणमात्रं फलाय विधीयते
विच्छिन्नप्रक्रियाणां तासामाश्रयत्वानुपपत्तेः॥ वाक्येन चाश्रयसंबंधे वाक्यभेदात्। किं त्वनुवचनांतराणि संख्यानिदि
ष्टानि फले विधीयंते तानि च संख्यायुक्तानुवचनत्व सामान्यान्निस्यानुवचनश्रुतीनि। ततश्च तासामेवाम
नेषां वतद्धर्माणां प्राप्तिरनुराष्ट्रेन च यस्तत्र नमः प्रवक्त्र इत्येति निगदानंतर सावः सामिधेन्यंगेनोक्तः सोप्यत्रा
ति दिश्यते। सत्तु निगदः क्रतुप्रयुक्तत्वान्न बहिः प्रयोगे लभ्यते तत स्तद्दृशेनानुवचनांतराणामपेक्षतुमप्यप्रयोग
५ ×मस्त्यसितः कीर्त्तनासावांत्संनिधिमात्रमपिनास्ति काम्ये व्यवधानान्नहि काम्यानामेवांगं स्यादव्यवधानात्स्वरूलाक्षेदेन च
प्रकरया × ५

श्रा॰ द॰ १ सिद्धिरितैरेव वाग्निसामिधनस्य प्रसंगात्सिद्धेर्नित्यानुवचननिवृत्तिर्नैतेषामनुवचनानां कृतोपकारत्वात्तथ
र्मपरिसूरितानां कथं सावापे स्यात्सावान्नास्ति प्रकरणं॥ सन्निधानमात्रं तु स्यात्तच्च प्रकरणाद्दुर्बलं प्रकरणात्तदितिद
र्शपूर्णमासांगमेवोपवीतं येऽनुपस्थापनागुणाः तेऽनुरवस्थानुवादेनैव द्वादशोपसत्त्ववद्विधातुं शक्या इति
न तद्वचोनैकां ततः प्रकरणानुपात्तिर्विज्ञायते। यतः प्रकरणपाठोऽभिविहितः स्यात्। यद्वा तिष्ठन्नन्वाहान्तरान्
च्य मित्यादिषु अनुवचनमात्रं श्रूयते। तत्र यदि सामिधेन्यनुवचनप्रकृतं स्यात्ततस्तदेवावगम्येत तद
10 भावात्त्वनुवचनमात्रमनुवाक्यादिसाधारणमिति न सामिधेन्यनुवृत्तिरवधार्यते। यदपि देवा वै सा
मिधेनीरनूच्येत्युते वचनं तदप्यार्थवादत्वान्न सामिधेन्यनुवृत्तिं सूचयति। तस्माद्दर्शपूर्णमासां
गमनुपवीतं। एवं द्वित्रीनात्मवातर प्रकरणान्तरावास्तं निधेश्च प्रकरणाद्दुर्बलत्वादसत्यपि विच्छेदे
सामिधेनीनां दर्शपूर्णमासांगत्वमनुपवीतस्य सिध्यतीति व्यर्थमिदमधिकरणं स्यात्। कश्चिदाह।
उपव्ययत इत्येकं पदमन्विताभिधानाय कर्तारमपेक्षमाणं सन्निहितेन कर्त्रान्वीयत इति। तदयुक्तं। २०
प्रत्ययार्थेनापूर्वेण धातोरन्विताभिधानसिद्धेः एवं च अनेन प्रत्ययेन सत्यपि सामिधेनीनां सन्नि
धानेऽधिकारापूर्वमेवाभिधानवत् सामिधेनीनां सन्निपातित्वेनापूर्वमनन्यवादतः पदस्यैवेत

तदंगमुपवीतं संभवतीति किमर्थमिदमधिकरणं। अपि चैवं पूर्वाधिकरणपूर्वपक्षेपि विच्छिन्नमप्यभिक्रमणं एकपदत्वा
त्सन्निहितेनैव प्रयाजकर्मान्वीयत इति तदधिकरणं वैयर्थ्यं स्यात्। ननु चाभिक्रममित्यनाख्यातत्वात् सिद्धवद्भवतीति
न कर्त्रकांक्षा। किं तु शेषिण्यस्तत्र कर्तापेक्षितो न च शेषिणान्विताभिधानमिति। नैवं। अवघातादिषु शेषिणा
प्यन्विताभिधानाभ्युपगमादपि च सर्वाण्येककार्याणि नियतानि कार्येण शेषिणान्वितमर्थमभिदधतीति यत्किंचि
देतत्। अपि च यदि न शेषिणान्विताभिधानं तर्हि अभितः सन्निक्रमणमुन्निधातव्यं। न ह्यनन्वितस्याभिधा
नं संभवति गुणभूतस्य कर्तुरनपेक्षितत्वान्न तेनान्विताभिधानं संभवतीति त्वयोक्तं। संनिधेर्वा सन्निहितेनैव प्रया
जकर्मान्विताभिधानात्तस्यार्थमेकमेकार्थत्वप्रतिपादनं। प्रधानविधिनाभिक्रमणमन्वितमन्वितमपि धीयत इति वि
न। तस्यापि शेषित्वात्तदुपवीतस्यापि तत्संभवत्वान्न सन्निहितेनापि सामिधेनीकर्मान्वयस्यात् अथानभिहितमाभि
क्रमणं ग्राहकांगत्वाद्यादुपवीतमपि गृह्णीयात्। यदपि शेषिणः कर्तापेक्षितो नानुष्ठानभूतमिति। तदपि विपरीत
मविहितस्य शेषापेक्षाभावात् क्रत्वपेक्षा तु क्रियायास्त्वात्तात्त्वादेवस्यादित्यास्तां तावत्॥ ॥गुणानां च परार्थत्वात्
असंबंधः समत्वात् स्यात्॥ ॥आधानप्रकरणे वारणवैकंकतानि यज्ञसंयुक्तानि पात्राणि श्रूयंते वारणो यज्ञा
वचरः वैकंकतो यज्ञावचर इति पवमानेष्टयोप्याधानप्रकरण एव प्रदेशांतरे श्रुताः। तत्र पात्रेषु संदेहः।
किं पवमानेष्ट्यंगं उत यज्ञमात्रांगमिति। तदर्थं च किं पवमानहवींष्याधानांगं उत तान्यपि आधानेन समप्र
धानानि अग्न्यर्थानीति। यज्ञांगं ततो यज्ञसंयोगात्साक्षादाधानेः संभवत्यपि पात्राण्यानर्थतदंगन्यायेन

ग्रा० त०

पवमानेष्टिषु नवंति अनंगत्वे तु कथं विहृपि यज्ञसंयुक्तानां प्रकृताधाननिवेशासंभवादिष्टीनां च स्वयमप्रकृतत्वात्
नारभ्यवादरूपेण सर्वयज्ञेषु संभवंति तत्राधानस्य द्वितीयासंयुक्ताग्निसंस्कारार्थतया फलवत्वादफला
नि पवमानहवींषि प्रकरणात्तदंगं। अत्रोच्यते। यदाहवनीये जुहोतीति वाक्यादेषामप्यग्न्यर्थता। न च नारभ्य
वादेयं सर्वहोमागमाहवनीयं विधत्ते न त्वाहवनीयांगत्वं पवमानहविषां। अत्र कश्चिदाह। अनारभ्यवादेन प्रकृताहव
नीयांगत्वेन विहितः पवमानेष्टिषु तिद्देशेन प्राप्तः। स च पवमानहविर्वेलायामनिष्पन्नत्वान्नांगं संभवतीत्यंगत्वेनि
हत्त्वेयस्तस्य प्रकृतौ दृष्टः साक्षात्संबंधांत्राः स इह संभवेन बाधनीयः अवश्यं च पवमानहविषामाधानांगत्व
वादिनाप्यग्निष्वादकत्वमभ्युपगंतव्यं। तच्च साक्षात्संबंधाबाधाय साक्षादेवास्तु किमाधाने प्रनाड्या समाश्रीयतेति
सिद्धमग्न्यर्थत्वं। तदिदमसारं। यत्तावदुक्तमंगत्वं निवृत्तमिति तत्त्वसिद्धांतप्रस्मरणान्न हि चोदकावगतमंगत्वं निवर्तते
यद्यपि चानिष्पन्नत्वान्न साधयति तथाप्यसाधयत एवांगत्वमवघातस्येव कृष्णलचरावुवर्तिष्ठते। तेन साक्षात्सं
बंधस्यांगत्वेनैवोपपन्नत्वान्न तात्सिद्ध्यर्थं साध्यत्वमंगीकर्तव्यं। अपि चार्थिकः प्रकृतौ साक्षात्संबंधो
गत्वमेव शास्त्रार्थः न चार्थिकं चोदकः प्रतिदिशतीति यद्बलेन साध्यता स्यात् प्रतिदृश्यतां वा संबंधः स तु येन केनापि
प्रकरणेन सिध्यतीति साध्यत्वविशेषः कुतो लभ्यते। यत्तु साध्यत्वमाधानांगत्ववादिनाप्यभ्युपगंतव्यमिति। सत्यम
भ्युपगतं। अस्ति हि तस्य प्रकरणं प्रमाणं। न वै तस्य किं प्रमाणं। प्रकरणमिति चेत्तथा सत्याधानांगत्वधारणे वाग्नीनां
साध्यत्वं स्यात्। यदि हि विशेषेऽपि न साध्यत्वं प्रकरणात्सिध्येत्ततोऽतिदेशवशेन साक्षात्त्वादित्याश्रयितत्वकत्वर्थमेवतु

प्रकरणादवगम्यते नातिदिष्टं साध्यत्वं तेन यदि प्रकरणमंगी क्रियेताधानांगतैव स्यात् न चेत्साध्यत्वमेव न स्याद्वि
श्वजिदादिवत्तु फलं कल्पयित्वा अग्नीनामंगत्वमेव स्यात्। अस्तु वातिदेशावगतसाक्षात्संबंधवशादेव साध्यत्वं
तद्रूपदेशात्मकप्रकरणावगतक्रत्वर्थत्वविरोधाद्बाधितव्यं। अपि च करणत्वेपीष्टीनां न भवति साक्षाद्दृष्टिसा
12 ध्यत्वमग्नीनां ताभिः सकलप्राकृतांगाहितोपकारसवित्वा अग्नीन्साधयंति तेन। आसर्वांगानुष्ठानादवस्थित
मुत्पत्त्यपूर्वद्वारभूतमंगी कर्तव्यं तत्सनाथाग्नीनां साध्यत्वं न स्यात्। अपि च न प्राकृताहवनीयस्य साक्षात्सं 12
बंधः अंगभूतेन हि प्रत्यक्षेणाहवनीयस्य संबंधो न साक्षाद्यागेन तदिहापि प्रकृतिवदतिदेशात्प्रनाडेव संबंधः
स्यात्। तस्मान्नैवमग्न्यर्थता सिध्यति। यत्त्वन्यदुत्तरं वाक्यं तदुच्यते। अयमभिप्रायो नाप्प्रकाशस्य। अनारभ्य विधाने न
कान्तस्यैव निष्पादयितव्यस्य फलवतः साधनत्वेनाफला निपत्तमानहवी विविधत्वे सप्तमी लक्षणया साध्यत्वमेव प्रति
पादयातत प्रेप्यासिद्ध्यानप्रतीतिवत्तस्माद्वाक्ये नाधानवत्पवमानहविषामग्न्यर्थत्वात्नाधानांगत्वमतः सर्वयज्ञा
र्थानि पात्राणीति। आचार्यस्त्वसत्यपि पवमानहविषामग्न्यर्थत्वे पात्राणां वाक्येन सर्वयज्ञार्थता सिध्यतीति वाक्य
द्वयपरिकल्पनाक्लेशं न ममृषे। व्रीहीनवहंतीत्यादिषु यथाश्रुतव्रीहिमात्रार्थत्वेऽवघातस्यानर्थक्यात् प्रक
रणानुप्रवेशाः तद्वशेन च व्रीहिशब्दस्य साधनरूपलक्षणाश्रयणं। इह तु यथाश्रुतयज्ञार्थत्वोपपदीहितीया
र्थस्यैव वाङ्नियमस्यानर्थक्याभावान्न लक्षणाश्रयणेन प्रकरणानुप्रवेशो नानायाया पद्विवमाने हि
सान्निध्योपात्तातियज्ञार्थानिश्रूयेरन् ततोनुवादस्य संज्ञवे सन्निहितगामित्वात्सप्तदशारत्नित्वमिव वाजपेये